E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.324

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
Devabhūmisaurabham
E-ISSN 2584-2870

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# भारतीयज्ञानपरम्परायां पाण्डुलिपीनां योगदानम्

## (Contribution of Manuscripts to the Indian Tradition of Knowledge)

- **संजय गिरिदासः**

**शोधच्छात्रः , संस्कृतविभागः ,**

**केन्द्रीयसंस्कृतविश्वविद्यालयः ( भोपालपरिसरः )**

**ईमेल — giridassanjoy@gmail.com**

**Mobile no - 9933160433**

### ❖ शोधसारः

भारतीयसंस्कृतिः आदिकालादेव ज्ञानप्रधानसंस्कृतिरूपेण प्रसिद्धा अस्ति। अस्मिन् देशे वेदाः, उपनिषदः, पुराणानि, दर्शनेषु प्रतिपादिताः सिद्धान्ताः, आयुर्वेदः, गणितम्, ज्योतिषम्, व्याकरणम्, साहित्यशास्त्रम् तथा अन्ये बहवः विद्याशाखाः सहस्राब्दपर्यन्तं विकसिताः सन्ति। विशालस्यास्य ज्ञानभण्डारस्य संरक्षणे, प्रसारे तथा परम्परागतसञ्चरणे पाण्डुलिपीनां (Manuscripts) अत्यन्तमहत्त्वपूर्णं योगदानमस्ति। मुद्रणप्रणाल्याः आविष्कारात् पूर्वं समस्तं ज्ञानं गुरुपरम्परया मौखिकरूपेण अथवा पाण्डुलिपिरूपेण एव संरक्षितं भवति स्म। अतः पाण्डुलिपयः भारतीयज्ञानपरम्परायाः प्रमुखाः वाहकाः तथा संरक्षकाः अभवन्। प्राचीनभारते तालपत्रेषु, भोजपत्रेषु, ताम्रपत्रेषु तथा पश्चात् कर्गजपत्रेषु लिखिताः असंख्याः पाण्डुलिपयः विद्यमानाः आसन्, येषु धार्मिकं, दार्शनिकं, वैज्ञानिकं तथा साहित्यिकविषयाणां बहुमूल्याः ग्रन्थाः संरक्षिताः सन्ति। विशेषतः वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि, काव्यग्रन्थाः, आयुर्वेदसंहिताः, ज्योतिषशास्त्रग्रन्थाः तथा गणितविषयकग्रन्थाः पाण्डुलिपिरूपेण परम्परया सञ्चारिताः सन्ति। एतेषां पाण्डुलिपीनां माध्यमेन न केवलं भारतीयदर्शनस्य तथा धर्मपरम्परायाः संरक्षणं जातमपि तु विज्ञानं, चिकित्सा, गणितं, खगोलशास्त्रं तथा साहित्यादीनां क्षेत्रेष्वपि ज्ञानस्य विकासः अभवत्। अतः अस्मिन् शोधप्रबन्धे "भारतीयज्ञानपरम्परायां पाण्डुलिपीनां योगदानम्"क इति विषयः विवेच्यते। अस्मिन् अध्ययनस्य मुख्योद्देश्यः अस्ति यत्प्राचीनभारते ज्ञानसंरक्षणे पाण्डुलिपीनां भूमिका, तासां ऐतिहासिकमहत्त्वम्, विविधेषु विद्याक्षेत्रेषु तासां योगदानम् तथा भारतीयसंस्कृतेः विकासे तासां प्रभावः इत्यादीनां पक्षाणां सम्यक् विश्लेषणम्। अध्ययनस्य माध्यमेन ज्ञायते यत् पाण्डुलिपयः केवलं ग्रन्थलेखनस्य साधनम् न, अपि तु ताः भारतीयज्ञानपरम्परायाः जीवितसाक्ष्यरूपेण अद्यापि विद्यमानाः सन्ति।

अन्ततः निष्कर्षरूपेण वक्तुं शक्यते यद्भारतीयज्ञानपरम्परायाः संरक्षणे, संवर्धने तथा विश्वव्यापीप्रसारे पाण्डुलिपीनां योगदानमनन्यम् तथा अमूल्यमस्ति। अतः एतेषां पाण्डुलिपीनां संरक्षणम्, सम्पादनम् तथा डिजिटलीकरणम् अद्यतनकाले अत्यन्तावश्यकं कार्यमिति प्रतिपद्यते।

### ❖ कूटशब्दाः

भारतीयज्ञानपरम्परा ,पाण्डुलिपिसंस्कृतिः ,वेदोपनिषदपरम्परा ,ज्ञानसंरक्षणम् , तालपत्रपाण्डुलिपयः , भारतीयविद्यापरम्परा, शास्त्रपरम्परा, सांस्कृतिकधरोहरः

### ❖ अवतरणिका

भारतीयसंस्कृतिः आदिकालादारभ्य ज्ञानप्रधानसंस्कृतिरूपेण विश्वे विशिष्टस्थानं धारयति। अस्यां संस्कृतौ धर्मः, दर्शनम्, साहित्यं, व्याकरणम्, आयुर्वेदः, गणितम्, ज्योतिषम्, वास्तुशास्त्रम्, नाट्यशास्त्रम्, राजनीतिशास्त्रमित्यादयः बहवः ज्ञानविभागाः सहस्राब्दपर्यन्तं विकसिताः सन्ति। एषा समृद्धा ज्ञानपरम्परा केवलं मौखिकशिक्षणेन न, अपि तु पाण्डुलिपिलेखनपरम्परया अपि संरक्षिता तथा संवर्धिता अभवत्। अतः भारतीयज्ञानपरम्परायाः संरक्षणे तथा संवर्धने पाण्डुलिपीनां (Manuscripts) अत्यन्तं महत्त्वपूर्णं स्थानमस्ति।

प्राचीनकाले मुद्रणप्रणाल्याः अभावाद्विद्यानां संरक्षणं तथा प्रसारणं मुख्यतया गुरुशिष्यपरम्परया तथा पाण्डुलिपिलेखनप्रणाल्या एव सम्भवति स्म। ऋषयः, मुनयः, आचार्याः तथा विद्वांसः स्वानुभूतं तथा स्वाध्यायसमन्वितं ज्ञानं तालपत्रेषु, भोजपत्रेषु, ताम्रपत्रेषु तथा पश्चात् कर्गजपत्रेषु लिपिबद्धं कृत्वा अस्माकं

कृते सुरक्षितवन्तः । एतेषु पाण्डुलिपिषु वेदाः, उपनिषदः, ब्राह्मणग्रन्थाः, रामायणम्, महाभारतम्, पुराणानि, स्मृतिग्रन्थाः, आयुर्वेदसंहिताः, गणितशास्त्रग्रन्थाः, ज्योतिषशास्त्रग्रन्थाः तथा नानाविधानि काव्यशास्त्रग्रन्थाः अत्यन्तं सुव्यवस्थितरूपेण संरक्षिताः सन्ति।

भारतीयपरम्परायां ज्ञानस्य महत्त्वं प्राचीनग्रन्थेषु अत्यन्तं स्पष्टतया प्रतिपादितमस्ति। भगवद्गीतायां यदुक्तं -

**"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।**

**तत्स्वयं योगसंसिद्धः कालेनात्मनि बिन्दति ॥**[1]" इति।

अस्य अभिप्रायो यत् अस्मिन् संसारमध्ये ज्ञानस्य सदृशं पवित्रं किञ्चिदपि नास्ति। ज्ञानं मनुष्यजीवनस्य परमं प्रकाशरूपमस्ति, यदज्ञानान्धकारं नाशयति। अतः ज्ञानस्य संरक्षणं, संवर्धनं तथा परम्परया सञ्चरणं मानवसमाजस्य परमं कर्तव्यं मन्यते।

तथैव संस्कृतसाहित्ये विद्यानां महत्त्वमपि प्रतिपादितम् यद् -

**"विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्।**

**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः॥**[2]" इति।

अस्य तात्पर्यं यत् विद्या मनुष्यस्य सर्वोत्तमं भूषणमस्ति, सा गुप्तरूपेण स्थितं धनं च अस्ति, या यशः, सम्मानं तथा सुखं प्रदाति। एतादृशस्य ज्ञानसम्पदः संरक्षणे पाण्डुलिपयः प्रमुखं साधनरूपेण कार्यं कृतवन्तः।

भारतीयपरम्परायां पाण्डुलिपीनां स्थानं केवलं ग्रन्थलेखनमाध्यमरूपेण न, अपि तु सांस्कृतिकस्मृतिसञ्चयस्य, बौद्धिकपरम्परायाः तथा ऐतिहासिकज्ञानस्य संरक्षणस्य प्रमुखाधाररूपेणापि अवलोकनीयमस्ति । पाण्डुलिपयः प्राचीनभारतीयसमाजस्य धार्मिकजीवनं, दार्शनिकचिन्तनम्, सामाजिकव्यवस्था, वैज्ञानिकविकासः तथा साहित्यिकसमृद्धिः इत्यादीनां स्पष्टप्रतिबिम्बं प्रदर्शयन्ति।

विशेषतः आयुर्वेदे चरकसंहिता, सुश्रुतसंहिता; गणिते आर्यभटस्य आर्यभटीयम्; ज्योतिषे वराहमिहिरस्य बृहत्संहिता; व्याकरणे पाणिनीयाष्टाध्यायी; नाट्यशास्त्रे भरतमुनिना विरचितं नाट्यशास्त्रमेते सर्वे ग्रन्थाः प्रारम्भे पाण्डुलिपिरूपेण एव संरक्षिताः आसन्। यदि एते ग्रन्थाः पाण्डुलिपिरूपेण संरक्षिताः न स्युः, तर्हि भारतीयज्ञानपरम्परायाः एषा विशालसम्पदा अद्यतनकाले उपलब्धा न स्यात्।

अत एव पाण्डुलिपयः केवलं ग्रन्थरूपेण न, अपितु भारतीयबौद्धिकसम्पदः, सांस्कृतिकधरोहरस्य तथा ऐतिहासिकस्मृतिसञ्चयस्य जीवन्तप्रमाणरूपेण अवलोकनीयाः सन्ति। एतेषां पाण्डुलिपीनां अध्ययनं कृत्वा प्राचीनभारतीयसमाजस्य ज्ञानप्रणाली, शिक्षापद्धतिः, सांस्कृतिकमूल्यानि तथा बौद्धिकविकासः इत्यादीनि विषयाः अधिकस्पष्टतया ज्ञातुं शक्यन्ते।

अतः अस्य शोधकार्यस्य प्रमुखोद्देश्यः अस्ति यत्प्राचीनभारतीयज्ञानपरम्परायां पाण्डुलिपीनां महत्त्वपूर्णं योगदानं विवेचयितुं, तासां माध्यमेन ज्ञानसंरक्षणस्य प्रक्रियां विश्लेषयितुं तथा भारतीयसंस्कृतेः विकासे तासां प्रभावं सम्यकरूपेण प्रकाशयितुम्। अस्य विषयस्याध्ययनात् स्पष्टं भवति यत्पाण्डुलिपयः केवलं इतिहासस्य अवशेषाः न, अपि तु भारतीयज्ञानपरम्परायाः अमूल्यधरोहराः सन्ति, ये अद्यापि विश्वमानवसमाजस्य ज्ञानविकासे महत्वपूर्णं योगदानं ददन्ति।

## ❖ पूर्वकृतानुसन्धानस्य सर्वेक्षणम्

"भारतीयज्ञानपरम्परायां पाण्डुलिपीनां योगदानम्" इति विषयः पाण्डुलिपिशास्त्रं (Manuscriptology), भारतीयसाहित्येतिहासस्तथा सांस्कृतिकाध्ययनस्य दृष्ट्या अत्यन्तं महत्त्वपूर्णः विषयः अस्ति। अस्मिन् विषये अनेकैः विद्वद्भिः विभिन्नदृष्टिकोणात् अध्ययनकार्यं कृतमस्ति। तेषां ग्रन्थेषु पाण्डुलिपीनां ऐतिहासिकमहत्त्वम्, ज्ञानसंरक्षणे तासां भूमिका, पाण्डुलिपिलेखनपरम्परा तथा भारतीयज्ञानपरम्परायाः विकासे तासां प्रभावः इत्यादयः विषयाः विस्तृतरूपेण विवेचिताः सन्ति।

१. आर्. सी. गौर (R. C. Gaur) महोदयेन विरचिते 'Indian Manuscriptology' इति ग्रन्थे भारतीयपाण्डुलिपिपरम्परायाः स्वरूपम्, पाण्डुलिपीनां प्रकाराः, लेखनसामग्री तथा संरक्षणपद्धतयः इत्यादयः विषयाः अत्यन्तं व्यवस्थितरूपेण विवेचिताः सन्ति। अस्मिन् ग्रन्थे लेखकः प्रतिपादयति यत् भारतवर्षे पाण्डुलिपयः केवलं ग्रन्थलेखनस्य माध्यमम् न सन्ति, अपि तु ताः भारतीयज्ञानपरम्परायाः प्रमुखाः संवाहकाः सन्ति।

२. मोरित्स् विन्टरनिट्ज् (M. Winternitz) महोदयस्य 'A History of Indian Literature' इति ग्रन्थे भारतीयसाहित्यपरम्परायाः विकासः तथा तस्य संरक्षणे पाण्डुलिपीनां भूमिका विस्तृतरूपेण विवेचिता अस्ति। सः प्रतिपादयति यत् भारतीयसाहित्यस्य विशालपरम्परा मुख्यतया पाण्डुलिपीनां माध्यमेन एव परम्परया सञ्चारिता।

३. रिचर्ड् सालोमन (Richard Salomon) महोदयेन 'Indian Epigraphy' इति ग्रन्थे भारतीयलिपिपरम्परायाः विकासः तथा प्राचीनग्रन्थानां लेखनपरम्परा विश्लेषिता अस्ति। तस्माज्ज्ञायते यद्भारतीयज्ञानपरम्परायाः संरक्षणे लिपिपद्धतिः तथा पाण्डुलिपिलेखनप्रणाली अत्यन्तं महत्त्वपूर्णा आसीत्
।

४. एस्. एन. दासगुप्तः (S. N. Dasgupta) महोदयेन 'History of Indian Philosophy' इति ग्रन्थे भारतीयदर्शनपरम्परायाः विकासक्रमः विस्तृतरूपेण प्रतिपादितः अस्ति। अस्य अध्ययनात् स्पष्टं भवति यद्भारतीयदर्शनशास्त्रस्य बहवः मूलग्रन्थाः पाण्डुलिपिरूपेण एव दीर्घकालपर्यन्तं संरक्षिताः आसन्।

५. शेल्डन पोलॉक (Sheldon Pollock) महोदयेन विरचिते ‘The Language of the Gods in the World of Men’ इति ग्रन्थे संस्कृतभाषायाः सांस्कृतिकमहत्त्वं तथा तस्य साहित्यिकपरम्परायाः प्रसारो विवेचितः अस्ति। अस्य अध्ययनादपि ज्ञायते यत्संस्कृतसाहित्यस्य विशालपरम्परा पाण्डुलिपीनां माध्यमेन एव संरक्षिता अभवत्।

एवं च उपर्युक्तसाहित्यसमीक्षयाः ज्ञायते यत् अनेकैः विद्वद्भिः भारतीयपाण्डुलिपिपरम्परायाः विविधपक्षाः विवेचिताः सन्ति, तथापि भारतीयज्ञानपरम्परायां पाण्डुलिपीनां योगदानस्य विश्लेषणमद्यापि विस्तृतानुसन्धानस्य अपेक्षां करोति । तस्मात्पाण्डुलिपीनां माध्यमेन ज्ञानसंरक्षणस्य प्रक्रियां, तासां ऐतिहासिकमहत्त्वं तथा भारतीयसंस्कृतेः विकासे तासां योगदानं सम्यकरूपेण विवेचयितुं प्रयत्नः क्रियते।

## ❖ शोधोद्देश्यानि

“भारतीयज्ञानपरम्परायां पाण्डुलिपीनां योगदानम्” इति विषयः भारतीयसंस्कृतेः, साहित्यस्य तथा ज्ञानपरम्परायाः अध्ययनस्य दृष्ट्या अत्यन्तं महत्त्वपूर्णः विषयः अस्ति। प्राचीनकाले मुद्रणप्रणाल्याः अभावात् समस्तज्ञानसम्पदा पाण्डुलिपीनां माध्यमेन एव संरक्षिता तथा परम्परया सञ्चारिता अभवत्। अतः पाण्डुलिपयः भारतीयबौद्धिकपरम्परायाः प्रमुखाः आधारस्तम्भाः इति वक्तुं शक्यते। अस्मिन् शोधकार्ये पाण्डुलिपीनां माध्यमेन भारतीयज्ञानपरम्परायाः संरक्षणं, संवर्धनं तथा प्रसारः इत्यादीनां विषयाणां सम्यगध्ययनं कर्तुं प्रयत्नः क्रियते। अध्ययनस्यास्य मुख्यानि शोधोद्देश्यानि यथा –

**१. भारतीयज्ञानपरम्परायाः स्वरूपस्य अवबोधनम्।**
अस्माद्वेदोपनिषदादिप्राचीनग्रन्थेषु निहितस्य ज्ञानस्य स्वरूपं, तस्य दार्शनिकं, धार्मिकं तथा सांस्कृतिकमहत्त्वं च सम्यकरूपेण अवगन्तुं प्रयत्नः क्रियते।

**२. पाण्डुलिपीनां माध्यमेन ज्ञानसंरक्षणस्य प्रक्रियायाः अध्ययनम्।**
प्राचीनकाले ऋषिभिः, मुनिभिः तथा विद्वद्भिः स्वज्ञानं तालपत्रेषु, भोजपत्रेषु, ताम्रपत्रेषु तथा कर्गजपत्रेषु लिपिबद्धं कृत्वा यथारूपेण संरक्षितम्, तस्य प्रक्रियायाः विश्लेषणमस्य अध्ययनस्य प्रमुखोद्देश्येषु एकमस्ति।

**३. भारतीयशास्त्रपरम्परायां पाण्डुलिपीनां योगदानस्य मूल्याङ्कनम्।**
आयुर्वेदे, गणिते, ज्योतिषे, व्याकरणे, नाट्यशास्त्रे तथा अन्येषु ज्ञानविषयेषु पाण्डुलिपीनां माध्यमेन ज्ञानस्य विकासः कथमभवदित्यस्य सम्यग्विवेचनमस्य अध्ययनस्य महत्त्वपूर्णं उद्देश्यमस्ति।

**४. भारतीयसाहित्यसंरक्षणे पाण्डुलिपीनां भूमिकायाः परीक्षणम्।**
रामायणम्, महाभारतम्, पुराणानि, काव्यग्रन्थाः तथा अन्ये बहवः साहित्यिकग्रन्थाः पाण्डुलिपिरूपेण कथं संरक्षितास्तथा प्रसारिताः आसन्, इत्यस्य अध्ययनम् अस्य शोधस्य अन्यतममुद्देशमस्ति।

**५. पाण्डुलिपीनां सांस्कृतिकमहत्त्वस्य विश्लेषणम्।**
पाण्डुलिपयः केवलं ग्रन्थसंग्रहः न सन्ति, अपि तु ताः प्राचीनभारतीयसमाजस्य धार्मिकजीवनम्, सामाजिकव्यवस्था, परम्परास्तथा सांस्कृतिकमूल्यानि प्रतिपादयन्ति। अतः तासां सांस्कृतिकमहत्त्वस्य परीक्षणमपि अस्य अध्ययनस्य प्रमुखमुद्देश्यमस्ति।

**६. आधुनिककाले पाण्डुलिपीनां संरक्षणस्य आवश्यकता प्रकाशयितुम्।**
कालप्रभावेन, पर्यावरणदोषैः तथा उपेक्षया अनेकाः प्राचीनपाण्डुलिपयः विनाशस्य समीपे सन्ति । अतः तासां संरक्षणस्य महत्त्वं तथा आधुनिकवैज्ञानिकपद्धतिभिः तासां संरक्षणसम्भावनाः अस्य अध्ययनस्य माध्यमेन प्रकाशयितुं प्रयत्नः क्रियते।

**७. पाण्डुलिपीनां अध्ययनद्वारा भारतीयज्ञानपरम्परायाः वैश्विकमहत्त्वस्य उद्घाटनम्।**
भारतीयपाण्डुलिपिसम्पदा केवलं भारतस्य एव न, अपि तु सम्पूर्णविश्वस्य ज्ञानधरोहररूपेणापि परिगण्यते। अतः तासां अध्ययनद्वारा वैश्विकज्ञानपरम्परायां भारतीयसंस्कृतेः योगदानं प्रकाशयितुमपि अस्य शोधकार्यस्य प्रमुखमुद्देश्यमस्ति।

अतः उपर्युक्तशोधोद्देश्यानां माध्यमेन अस्य अध्ययनस्य प्रयोजनमेतदेव यत्प्राचीनभारतीयज्ञानपरम्परायां पाण्डुलिपीनां महत्त्वपूर्णं योगदानं सम्यकरूपेण प्रकाशयितुं तथा तासां माध्यमेन भारतीयसंस्कृतेः समृद्धपरम्परायाः यथार्थबोधः कर्तुं शक्यते।

## ❖ शोधविषयाः

प्राचीनभारतीयसंस्कृतौ ज्ञानस्य संरक्षणं, संवर्धनं तथा परम्परया सञ्चरणं अत्यन्तं महत्त्वपूर्णं मन्यते । अस्य ज्ञानभण्डारस्य संरक्षणे पाण्डुलिपीनां (Manuscripts) अनन्यं योगदानमस्ति। मुद्रणप्रणाल्याः अभावात् प्राचीनकाले विद्वांसः, आचार्याः तथा ऋषयः स्वज्ञानं पाण्डुलिपिरूपेण लिपिबद्धं कृत्वा

भावीपीढीनां कृते सुरक्षितवन्तः। अतः पाण्डुलिपयः केवलं ग्रन्थरूपेण न, अपि तु भारतीयज्ञानपरम्परायाः जीवितवाहकाः इति कथयितुं शक्यते। अतः भारतीयज्ञानपरम्परायां पाण्डुलिपीनां योगदानं निम्नलिखितेषु बिन्दुषु विस्तृतरूपेण अवलोकनीयम् -

### १. वेदोपनिषदादिज्ञानस्य संरक्षणे पाण्डुलिपीनां योगदानम्

भारतीयज्ञानपरम्परायाः मूलाधाररूपेण वेदाः, उपनिषदः, ब्राह्मणग्रन्थाः तथा आरण्यकग्रन्थाः परिगण्यन्ते। एते ग्रन्थाः भारतीयदर्शनस्य, धार्मिकचिन्तनस्य तथा आध्यात्मिकपरम्परायाः प्रमुखाः स्रोतः सन्ति। प्राचीनकाले एतेषां ज्ञानराशेः संरक्षणं मुख्यतया गुरुशिष्यपरम्परया मौखिकरूपेण एव क्रियते स्म, किन्तु कालान्तरं तस्य दीर्घकालीनसंरक्षणार्थं विद्वद्भिः एते ग्रन्थाः पाण्डुलिपिरूपेण लिपिबद्धाः अभवन्। तालपत्रेषु, भोजपत्रेषु तथा पश्चात् कर्गजपत्रेषु लिखिताः वेदोपनिषदादिग्रन्थाः पाण्डुलिपिरूपेण भारतस्य विभिन्नेषु प्रदेशेषु दीर्घकालपर्यन्तं सुरक्षिताः आसन्। एतेषां पाण्डुलिपीनां माध्यमेन वेदविद्या, ब्रह्मविद्या तथा आध्यात्मिकज्ञानस्य अखण्डपरम्परा परम्परया सञ्चारिता। यदि एते ग्रन्थाः केवलं मौखिकपरम्परायामेव स्थिताः स्युः, तर्हि कालप्रवाहे तेषां बहवः अंशाः नष्टाः स्युः , किन्तु पाण्डुलिपिलेखनप्रणाल्या तेषां दीर्घकालीनसंरक्षणं सम्भवम् अभवत्। यदुक्तं –

**"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**

**विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यन्ति ॥[3]"** इति।

अस्य भावो यत् इतिहासः तथा पुराणानि वेदज्ञानस्य विस्तारं तथा संरक्षणं कुर्वन्ति। पाण्डुलिपयः तु एतेषां इतिहासपुराणग्रन्थानां संरक्षणे प्रमुखमाध्यमरूपेण कार्यं कृतवन्तः।

वेदेषु निहितं ज्ञानं भारतीयसंस्कृतेः प्राचीनतमं तथा सर्वोच्चं ज्ञानरूपं मन्यते। तत्र प्रकृतिः, समाजः, धर्मः, यज्ञपरम्परा, दार्शनिकचिन्तनं तथा आध्यात्मिकानुभवः इत्यादयः विषयाः विस्तृतरूपेण प्रतिपादिताः सन्ति। उपनिषदः तु वेदानां दार्शनिकसाररूपेण प्रसिद्धाः सन्ति, येषु आत्मा, ब्रह्म, जगत् तथा मोक्ष इत्यादीनां गूढविषयाणां गम्भीरविचारः कृतः अस्ति।
एतज्ज्ञानस्य महत्त्वं उपनिषद्ग्रन्थेष्वपि स्पष्टतया प्रतिपादितमस्ति -

**"सा विद्या या विमुक्तये।[4]"** इति।

तथैव

**"सत्यं ज्ञानमनन्तं ब्रह्म।[5]"**

अस्य तात्पर्यं यत् ब्रह्म सत्यस्वरूपं, ज्ञानस्वरूपं तथा अनन्तस्वरूपमस्ति। एतादृशं आध्यात्मिकज्ञानं युगयुगान्तरपर्यन्तं सुरक्षितं भवेदिति हेतोः विद्वांसः पाण्डुलिपिरूपेण तस्य संरक्षणं कृतवन्तः।
अतः निःसंशयं वक्तुं शक्यते यद्वेदोपनिषदादिज्ञानस्य संरक्षणे पाण्डुलिपीनां योगदानमत्यन्तं महत्त्वपूर्णमस्ति। पाण्डुलिपयः एव ताः माध्यमानि सन्ति, येषां द्वारा प्राचीनभारतीयाध्यात्मिकज्ञानपरम्परा अद्यापि जीविता तथा सजीवा दृश्यते। अतः एतेषां पाण्डुलिपीनां संरक्षणं, सम्पादनं तथा अध्ययनमाधुनिककालस्य अत्यन्तावश्यकं कर्तव्यं मन्यते।

### २. भारतीयदर्शनपरम्परायाः विकासे पाण्डुलिपीनां भूमिका

भारतीयसंस्कृतौ दर्शनशास्त्रस्य स्थानमत्यन्तं गौरवपूर्णमस्ति। दर्शनं नाम केवलं तात्त्विकचिन्तनम् न, अपि तु जीवनस्य परमसत्यस्य अन्वेषणप्रक्रियापि अस्ति। प्राचीनभारते ऋषिभिः, मुनिभिः तथा आचार्यैः आत्मा, ब्रह्म, जगत्, कर्म, मोक्ष इत्यादीनां गूढविषयाणां विषये गम्भीरचिन्तनं कृतम्। एतादृशं दार्शनिकचिन्तनं विविधेषु शास्त्रग्रन्थेषु संगृहीतमस्ति, ये प्रारम्भे पाण्डुलिपिरूपेण एव संरक्षिताः आसन्। अतः भारतीयदर्शनपरम्परायाः संरक्षणे तथा विकासे पाण्डुलिपीनां भूमिका अत्यन्तं महत्त्वपूर्णा आसीत्। भारतीयदर्शनपरम्परायां समन्वयभावनायाः महत्त्वं प्रतिपादितं यथा -

**"एकं सद् विप्रा बहुधा वदन्ति।[6]"** इति।

अस्य भावो यत्सत्यं एकमेव अस्ति, किन्तु विद्वांसः तस्य विभिन्नरूपेण विवेचनं कुर्वन्ति। एषा भावना भारतीयधार्मिकपरम्परायाः सहिष्णुतायाः तथा समन्वयभावनायाः मूलाधाररूपेण स्वीकृता अस्ति।

भारतीयदर्शनपरम्परायां षड्दर्शनानि न्यायः, वैशेषिकः, सांख्यः, योगः, मीमांसा तथा वेदान्त इत्येतानि प्रमुखानि सन्ति। एतेषां दर्शनशास्त्रग्रन्थानां मूलरूपं दीर्घकालपर्यन्तं पाण्डुलिपिषु एव संरक्षितमासीत्। गौतमस्य न्यायसूत्रम्, कणादस्य वैशेषिकसूत्रम्, कपिलमुनिना प्रतिपादितं सांख्यदर्शनम्, पतञ्जलेः योगसूत्रम्, जैमिनीयमीमांसासूत्रम् तथा बादरायणस्य ब्रह्मसूत्रमेते सर्वे ग्रन्थाः प्रारम्भे पाण्डुलिपिरूपेण एव विद्यमानाः आसन्।
एतेषां ग्रन्थानां संरक्षणेन न केवलं दार्शनिकचिन्तनस्य परम्परा अविच्छिन्ना अभवत्, अपि तु विविधाचार्यैः तेषु भाष्यटीकादीनां रचनया दर्शनशास्त्रस्य विकासः अपि अभवत्। उदाहरणार्थमादि शंकराचार्यः, रामानुजाचार्यः, मध्वाचार्यः इत्यादयः महान् आचार्याः उपनिषद्भाष्येषु, ब्रह्मसूत्रभाष्येषु तथा गीताभाष्येषु गम्भीरदार्शनिकविचारान् प्रतिपादितवन्तः। एते सर्वे ग्रन्थाः अपि पाण्डुलिपिरूपेण एव दीर्घकालपर्यन्तं संरक्षिताः आसन्। उपनिषद्सु आत्मज्ञानस्य महत्त्वं प्रतिपादितम् यथा -

**"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।[7]"** इति।

अस्य तात्पर्यं यत् आत्मतत्त्वस्य बोधः मनुष्यजीवनस्य परमलक्ष्यम् अस्ति । एतादृशस्य आध्यात्मिकज्ञानस्य संरक्षणे पाण्डुलिपयः अत्यन्तं उपयोगिनः अभवन् ।
अतः निःसंशयं वक्तुं शक्यते यत् भारतीयदर्शनपरम्परायाः विकासे पाण्डुलिपीनां योगदानमत्यन्तं महत्त्वपूर्णमस्ति । पाण्डुलिपयः एव ताः माध्यमानि सन्ति, येषां द्वारा प्राचीनभारतीयदार्शनिकचिन्तनम् युगयुगान्तरपर्यन्तं सुरक्षितं भवितुमशकत् । अतः एतेषां पाण्डुलिपीनां संरक्षणं, सम्पादनं तथा अध्ययनम् आधुनिककाले अत्यन्तावश्यकं कार्यम् इति प्रतिपद्यते ।

### ३. विज्ञानविषयेषु ज्ञानसंरक्षणे पाण्डुलिपीनां योगदानम्

प्राचीनभारते विज्ञानस्य विकासः अत्यन्तं उन्नतरूपेण दृष्टिगोचरः भवति । आयुर्वेदः, गणितम्, ज्योतिषम्, खगोलशास्त्रम्, रसायनशास्त्रम्, वास्तुशास्त्रम् इत्यादयः अनेकाः विज्ञानविषयाः भारतीयविद्वद्भिः अत्यन्तं सूक्ष्मतया विकसिताः सन्ति । एतेषां विज्ञानशास्त्राणां बहुमूल्यं ज्ञानं प्रारम्भे पाण्डुलिपिरूपेण एव लिपिबद्धं कृत्वा परम्परया संरक्षितमभवत् । अतः विज्ञानक्षेत्रे ज्ञानसंरक्षणे पाण्डुलिपीनां योगदानमत्यन्तं महत्त्वपूर्णमसीत् ।
विशेषतः आयुर्वेदशास्त्रे चरकसंहिता तथा सुश्रुतसंहिता इत्येतौ ग्रन्थौ भारतीयचिकित्साविज्ञानस्य प्रमुखौ आधारस्तम्भौ मन्येते । चरकसंहितायां रोगनिदानम्, औषधोपचारः, आहारविहारः तथा स्वास्थ्यसंरक्षणस्य विविधाः सिद्धान्ताः विस्तृतरूपेण प्रतिपादिताः सन्ति । सुश्रुतसंहितायां तु शल्यचिकित्सायाः, शरीररचनायाः तथा विविधचिकित्सापद्धतीनां वैज्ञानिकविवेचनम् अस्ति । एते सर्वे ग्रन्थाः प्रारम्भे पाण्डुलिपिरूपेण एव सुरक्षिताः आसन् ।
तथैव गणितशास्त्रे आर्यभटस्य ‘आर्यभटीयम्’, ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः, भास्कराचार्यस्य लीलावती इत्यादयः ग्रन्थाः भारतीयगणितपरम्परायाः गौरवपूर्णानि उदाहरणानि सन्ति । एतेषु ग्रन्थेषु संख्यापद्धतिः, बीजगणितम्, ज्यामिति, खगोलगणना इत्यादीनां विषयाणां गम्भीरविवेचनं कृतमस्ति । एते ग्रन्थाः अपि प्रारम्भे पाण्डुलिपिरूपेण एव विद्यमानाः आसन्, येषां संरक्षणेन भारतीयगणितपरम्परा दीर्घकालपर्यन्तं सुरक्षिताभवत् ।
खगोलशास्त्रस्य क्षेत्रे वराहमिहिरस्य ‘बृहत्संहिता’ तथा पञ्चसिद्धान्तिका इत्यादयः ग्रन्थाः अत्यन्तं प्रसिद्धाः सन्ति । एतेषु ग्रन्थेषु ग्रह-नक्षत्राणां गतिः, कालगणना, ग्रहणविज्ञानम् तथा ज्योतिषशास्त्रस्य विविधाः सिद्धान्ताः विस्तृतरूपेण प्रतिपादिताः सन्ति । एतत् सर्वं ज्ञानं पाण्डुलिपीनां माध्यमेन एव सुरक्षितं भवितुमशकत् ।
अतः उपर्युक्तविवेचनात् स्पष्टं यत्प्राचीनभारते विज्ञानविषयेषु उपलब्धं बहुमूल्यं ज्ञानं पाण्डुलिपीनां माध्यमेन एव दीर्घकालपर्यन्तं संरक्षितमभवत् । यदि एते ग्रन्थाः पाण्डुलिपिरूपेण सुरक्षिताः न स्युः, तर्हि भारतीयवैज्ञानिकपरम्परायाः अस्य महतः ज्ञानभण्डारस्य बहवः अंशाः अद्यतनकाले उपलब्धाः न स्युः । अतः पाण्डुलिपयः भारतीयवैज्ञानिकज्ञानपरम्परायाः अमूल्यधरोहरारूपेण परिगण्यन्ते । अतः एतेषां पाण्डुलिपीनां संरक्षणं, सम्पादनं तथा वैज्ञानिकदृष्ट्या अध्ययनं आधुनिककाले अत्यन्तावश्यकं कार्यमिति प्रतिपद्यते, येन प्राचीनभारतीयविज्ञानपरम्परायाः यथार्थमहत्त्वमधिकस्पष्टतया प्रकाशं प्राप्नुयात् ।

### ४. साहित्यपरम्परायाः संरक्षणे पाण्डुलिपीनां महत्त्वम्

भारतीयसंस्कृतौ साहित्यस्य स्थानं अत्यन्तं गौरवपूर्णं तथा महत्त्वपूर्णं मन्यते । प्राचीनकालादारभ्य भारतवर्षे विविधेषु भाषासु तथा शास्त्रेषु असंख्याः साहित्यिकग्रन्थाः रचिताः सन्ति । एतेषु ग्रन्थेषु काव्यं, नाटकं, आख्यानम्, पुराणकथाः, नीतिग्रन्थाः, धार्मिकसाहित्यं तथा दार्शनिकग्रन्थाः इत्यादयः विषयाः अत्यन्तं समृद्धरूपेण प्रतिपादिताः सन्ति । एतादृशस्य साहित्यभण्डारस्य संरक्षणे पाण्डुलिपीनामनन्यं योगदानमस्ति । मुद्रणयन्त्रस्य आविष्कारात्पूर्वं एते सर्वे ग्रन्थाः तालपत्रेषु, भोजपत्रेषु अथवा कर्गजपत्रेषु लिखिताः पाण्डुलिपिरूपेण एव सुरक्षिताः आसन् । भारतीयसाहित्यपरम्परायां रामायणम्, महाभारतम्, पुराणानि, कथासरित्सागरः, पञ्चतन्त्रम्, कालिदासस्य रघुवंशम्, कुमारसम्भवम्, अभिज्ञानशाकुन्तलम् इत्यादयः असंख्याः काव्यग्रन्थाः अत्यन्तं प्रसिद्धाः सन्ति । एते सर्वे ग्रन्थाः दीर्घकालपर्यन्तं पाण्डुलिपिरूपेण एव संरक्षिताः आसन् । विद्वांसः तथा लिपिकाराः पुनः पुनः तेषां प्रतिलिपीनां निर्माणं कृत्वा तान् ग्रन्थान् परम्परया संरक्षितवन्तः। यदि एषा पाण्डुलिपिपरम्परा न स्यात्, तर्हि एते बहुमूल्याः साहित्यग्रन्थाः अद्यतनकाले उपलब्धाः न स्युः ।

भारतीयसाहित्यस्य वैशिष्ट्यं यदस्मिन् साहित्ये केवलं काव्यरसः एव न, अपि तु धर्मः, नीति, दर्शनम्, समाजजीवनम् तथा सांस्कृतिकमूल्यानि अपि प्रतिबिम्बितानि दृश्यन्ति । एतेषां पाण्डुलिपीनां अध्ययनद्वारा प्राचीनभारतीयसमाजस्य जीवनशैली, सांस्कृतिकपरम्परा तथा सामाजिकव्यवस्था इत्यादीनां विषयाणां स्पष्टबोधः भवति ।
अतः निःसंशयं वक्तुं शक्यते यद्भारतीयसाहित्यपरम्परायाः संरक्षणे, संवर्धने तथा प्रसारे पाण्डुलिपीनां योगदानमत्यन्तं महत्त्वपूर्णमस्ति । पाण्डुलिपयः केवलं ग्रन्थसंग्रहः न, अपि तु भारतीयसंस्कृतेः, साहित्यिकपरम्परायाः तथा बौद्धिकसम्पदः अमूल्यधरोहररूपेण अद्यापि विद्यमानाः सन्ति । अतः एतेषां पाण्डुलिपीनां संरक्षणं, सम्पादनं तथा वैज्ञानिकदृष्ट्या अध्ययनं आधुनिककाले अत्यन्तावश्यकं कार्यमिति प्रतिपद्यते ।

### ५. भारतीयसंस्कृतेः संरक्षणे पाण्डुलिपीनां योगदानम्

भारतीयसंस्कृतिः विश्वस्य प्राचीनतमासु तथा समृद्धतमासु संस्कृतिषु गणनीया अस्ति । अस्याः संस्कृतेः मूलाधारः धर्मः, दर्शनम्, साहित्यं, कला, विज्ञानम् तथा सामाजिकमूल्यानि सन्ति । एते सर्वे तत्त्वानि प्राचीनभारतीयग्रन्थेषु निबद्धानि सन्ति, ये प्रारम्भे पाण्डुलिपिरूपेण एव संरक्षिताः आसन् । अतः भारतीयसंस्कृतेः संरक्षणे तथा प्रसारे पाण्डुलिपीनां योगदानमत्यन्तं महत्त्वपूर्णमिति निर्विवादं वक्तुं शक्यते । तदुक्तं -

**"साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।**

**तृणं न खादन्नपि जीवमानः तद्भोगधेयं परमं पशूनाम् ॥[8]"** इति।

अस्य अभिप्रायो यत् साहित्यं, संगीतं तथा कला मानवजीवनस्य संस्कारस्य तथा सामाजिकविकासस्य मूलाधाराः सन्ति । पाण्डुलिपयः तु एतेषां साहित्यकला-संस्कृतिपरम्पराणां संरक्षणे प्रमुखभूमिकां वहन्ति।

प्राचीनकाले विद्वांसः, ऋषयः, मुनयः तथा आचार्याः स्वस्वज्ञानं तालपत्रेषु, भोजपत्रेषु अथवा कर्गजपत्रेषु लिखित्वा पाण्डुलिपिरूपेण सुरक्षितं कृतवन्तः। एतादृशेषु ग्रन्थेषु धर्मशास्त्राणि, पुराणानि, इतिहासग्रन्थाः, काव्यानि, नाटकानि, आयुर्वेदग्रन्थाः, ज्योतिषशास्त्रग्रन्थाः तथा अन्यानि बहूनि विषयज्ञानानि संगृहीतानि सन्ति । एतेषां पाण्डुलिपीनां माध्यमेन भारतीयसंस्कृतेः विविधाः आयामाः यथा - धार्मिकं, दार्शनिकं, सामाजिकं तथा सांस्कृतिकं युगयुगान्तरपर्यन्तं सुरक्षिताः अभवन्।

विशेषतः रामायणम्, महाभारतम्, अष्टादशपुराणानि, धर्मशास्त्रग्रन्थाः तथा विविधाः स्मृतिग्रन्थाः भारतीयसंस्कृतेः मूलभूतमूल्यानि प्रतिपादयन्ति । एते ग्रन्थाः पाण्डुलिपिरूपेण दीर्घकालपर्यन्तं संरक्षिताः आसन्, येषां संरक्षणेन भारतीयसंस्कृतेः परम्परा अविच्छिन्नरूपेण प्रवहति स्म।

भारतीयसंस्कृतेः वैशिष्ट्यं "सर्वजनहिताय, सर्वजनसुखाय" इति आदर्शे निहितम् अस्ति। एषः आदर्शः प्राचीनग्रन्थेषु स्पष्टतया प्रतिपादितः अस्ति। यदुक्तं -

**"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥"** इति।

अपि च

**"अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्॥[9]"** इति।

अस्य अभिप्रायो यत्समग्रं विश्वं एकं कुटुम्बमिति भावना भारतीयसंस्कृतेः मूलस्वरूपमस्ति । एषा उदात्तभावना पाण्डुलिपीनां माध्यमेन परम्परया प्रसारिताभवत्।

एवं दृष्ट्वा स्पष्टं भवति यत्पाण्डुलिपयः केवलं ग्रन्थरूपेण न, अपि तु भारतीयसंस्कृतेः जीवितपरम्परायाः साक्षिणः सन्ति । एतेषु पाण्डुलिपिषु भारतीयजीवनदर्शनम्, सांस्कृतिकमूल्यानि, धार्मिकास्थाः तथा सामाजिकपरम्पराः अत्यन्तं सजीवरूपेण प्रतिबिम्बिताः दृश्यन्ति।

अतः निःसंशयं वक्तुं शक्यते यद्भारतीयसंस्कृतेः संरक्षणे, संवर्धने तथा विश्वे प्रसारे पाण्डुलिपीनां योगदानमत्यन्तं महत्त्वपूर्णमस्ति। अद्यतनकाले अपि एतेषां पाण्डुलिपीनां वैज्ञानिकदृष्ट्या संरक्षणम्, डिजिटलीकरणम्, सम्पादनम् तथा अनुसन्धानमत्यन्तावश्यकमस्ति । एतादृशैः प्रयासैः एव अस्माकं प्राचीनभारतीयसंस्कृतेः अमूल्यधरोहरः भावीपीढीनां कृते सुरक्षितः भवितुम् शक्यते।

## ❖ निष्कर्षः

उपर्युक्तविवेचनात् स्पष्टं भवति यत् पाण्डुलिपयः केवलं प्राचीनग्रन्थानां संग्रहः न, अपि तु भारतीयज्ञानपरम्परायाः, सांस्कृतिकसमृद्धेः तथा बौद्धिकधरोहरस्य अमूल्यनिधयः सन्ति। प्राचीनभारते विद्वद्भिः, ऋषिभिः, मुनिभिः तथा आचार्यैः स्वस्वानुभवेन, अनुसन्धानपरम्परया तथा गम्भीरचिन्तनेन प्राप्तं बहुमूल्यं ज्ञानं पाण्डुलिपिषु लिखित्वा सुरक्षितं कृतम्। तस्माद्वेदोपनिषदादीनां आध्यात्मिकज्ञानम्, दर्शनशास्त्रस्य गूढतत्त्वानि, विज्ञानशास्त्रस्य विविधसिद्धान्ताः, साहित्यपरम्परायाः सौन्दर्यबोधः तथा भारतीयसंस्कृतेः उदात्तमूल्यानि युगान्तरपर्यन्तं संरक्षितानि अभवन्। विशेषतः वेदोपनिषदादीनां ज्ञानपरम्परायाः संरक्षणे पाण्डुलिपयः प्रमुखं माध्यममभवन्। एतेषां माध्यमेन ऋषीणां आध्यात्मिकदर्शनम्, आत्मविद्यायाः महत्त्वम् तथा मोक्षमार्गस्य विवेचनमद्यापि उपलब्धं दृश्यते। तथैव भारतीयदर्शनपरम्परायाः विकासे अपि पाण्डुलिपीनां योगदानमत्यन्तं महत्त्वपूर्णमस्ति। न्याय-वैशेषिक-सांख्य-योग-मीमांसा तथा वेदान्त इत्यादीनां दर्शनशास्त्रग्रन्थानां संरक्षणं पाण्डुलिपिरूपेण एव अभवत्, येषां अध्ययनद्वारा भारतीयदार्शनिकचिन्तनस्य गाम्भीर्यं तथा वैशिष्ट्यं स्पष्टतया अवगन्तुं शक्यते। एवमेव विज्ञानक्षेत्रे अपि पाण्डुलिपयः ज्ञानसंरक्षणस्य मुख्याधाररूपेण स्थिताः सन्ति। आयुर्वेदः, गणितं, ज्योतिषं, खगोलशास्त्रं, रसायनशास्त्रं, वास्तुशास्त्रमित्यादीनां विषयाणां बहुमूल्यं ज्ञानं पाण्डुलिपिषु सुरक्षितमासीत्। चरकसंहिता, सुश्रुतसंहिता, आर्यभटीयम्, बृहत्संहिता इत्यादयः ग्रन्थाः भारतीयवैज्ञानिकपरम्परायाः उत्कृष्टदृष्टान्ताः सन्ति, ये प्रारम्भे पाण्डुलिपिरूपेण एव संरक्षिताः आसन्।

तथैव साहित्यपरम्परायाः संरक्षणे पाण्डुलिपीनां महत्त्वं अपूर्वमस्ति । रामायणम्, महाभारतम्, पुराणानि, कालिदासस्य काव्यानि तथा अन्ये बहवः साहित्यग्रन्थाः पाण्डुलिपिपरम्परया एव अद्यतनकाले उपलब्धाः सन्ति । एतेषु ग्रन्थेषु न केवलं काव्यसौन्दर्यं दृश्यते, अपि तु तेषां माध्यमेन प्राचीनभारतीयसमाजस्य जीवनमूल्यानि, नैतिकदृष्टिः तथा सांस्कृतिकपरम्परा अपि स्पष्टतया प्रतिबिम्बिता दृश्यते।

भारतीयसंस्कृतेः संरक्षणे अपि पाण्डुलिपयः अनिवार्यभूमिकां निर्वहन्ति। धर्मः, नीतिः, समाजव्यवस्था, लोकाचारः तथा आध्यात्मिकमूल्यानि इत्यादयः विषयाः पाण्डुलिपिषु संगृहीताः सन्ति, ये भारतीयजीवनदर्शनस्य मूलाधाररूपेण प्रतिष्ठिताः सन्ति । अतः पाण्डुलिपयः भारतीयसंस्कृतेः ऐतिहासिकस्मृतिस्वरूपाः तथा सांस्कृतिकपरम्परायाः जीवितसाक्षिणः इति वक्तुं शक्यते।

अद्यतनकाले तु अनेकाः पाण्डुलिपयः जीर्णावस्थायां सन्ति, केचन तु कालप्रवाहे नष्टाः अपि अभवन्। अतः एतेषां संरक्षणं अत्यन्तावश्यकमस्ति। राष्ट्रीयपाण्डुलिपिमिशनम् तथा अन्याः संस्थाः पाण्डुलिपीनां संरक्षणे, सूचीकरणे, डिजिटलीकरणे तथा सम्पादने महत्त्वपूर्णं कार्यं कुर्वन्ति । आधुनिकतन्त्रज्ञानस्य साहाय्येन पाण्डुलिपीनां डिजिटलरूपेण संरक्षणं कृत्वा तासामध्ययनमधिकसुलभं कर्तुं शक्यते।

अतः अन्ततः इदं स्पष्टं भवति यत्पाण्डुलिपयः भारतीयज्ञानपरम्परायाः, सांस्कृतिकसमृद्धेः तथा बौद्धिकेतिहासस्य अमूल्यधरोहराः सन्ति। तासां संरक्षणम्, अनुसन्धानम् तथा व्यापकप्रचारः न केवलं इतिहासस्य अध्ययनाय आवश्यकः अस्ति, अपि तु भावीपीढीनां कृते अपि अत्यन्तमुपयोगी भविष्यति। यदि वयं एतासां पाण्डुलिपीनां यथोचितरूपेण संरक्षणं करिष्यामः, तर्हि प्राचीनभारतीयज्ञानपरम्परायाः महान् प्रकाशः भविष्यकालस्य समाजं मार्गदर्शनं कर्तुं समर्थः भविष्यति।

## ❖ भविष्ये अनुसंधानस्य संभावनाः

भारतीयपाण्डुलिपयः ज्ञानसम्पदः, सांस्कृतिकधरोहरस्तथा ऐतिहासिकदृष्ट्या अत्यन्तं महत्त्वपूर्णाः स्रोतांसि सन्ति। अद्यापि भारतस्य विविधेषु प्रदेशेषु मठेषु, मन्दिरेषु, निजीग्रन्थालयेषु तथा परम्परागतपरिवारेषु असंख्याः पाण्डुलिपयः अप्रकाशितरूपेण सुरक्षिताः सन्ति। तासां बह्व्यः पाण्डुलिपयः अद्यावधि न सम्यक् अन्वेषिताः, न सम्पादिताः, न च अनूदिताः। अतः भविष्ये पाण्डुलिपिविषये अनुसंधानस्य विशालाः संभावनाः दृश्यन्ते। यथा -

१. पाण्डुलिपीनां अन्वेषणं (Manuscript Exploration) अत्यन्तं आवश्यकमस्ति। देशस्य ग्रामेषु, मठेषु तथा परम्परागतपुस्तकसंग्रहेषु अद्यापि बह्व्यः दुर्लभाः पाण्डुलिपयः गुप्तरूपेण सन्ति। यदि तासां व्यवस्थितरूपेण अन्वेषणं क्रियते, तर्हि प्राचीनभारतीयज्ञानपरम्परायाः अनेकाः नूतनाः आयामाः प्रकाशं प्राप्स्यन्ति।

२. पाण्डुलिपीनां सम्पादनम् (Critical Editing) अपि अनुसंधानस्य महत्त्वपूर्णः विषयः अस्ति। अनेकाः प्राचीनग्रन्थाः विभिन्नपाण्डुलिपिषु भिन्नभिन्नरूपेण उपलब्धाः सन्ति। तेषां पाठभेदानां सम्यक् परीक्षणं कृत्वा वैज्ञानिकपद्धत्या समीक्षितसंस्करणस्य निर्माणं भविष्ये अनुसंधानकर्तृभिः कर्तव्यं भवति।

३. पाण्डुलिपीनां डिजिटलीकरणम् (Digitization) आधुनिककालस्य अत्यन्तं आवश्यकः उपक्रमः अस्ति। कर्गजपत्रेषु, तालपत्रेषु अथवा भोजपत्रेषु लिखिताः पाण्डुलिपयः कालप्रवाहे नष्टाः भवितुं शक्नुवन्ति। अतः तासां उच्चगुणवत्तायुक्तं डिजिटलरूपेण संरक्षणं कृत्वा भावीपीढीनां कृते सुरक्षितं कर्तुं शक्यते।

४. पाण्डुलिपीनां अन्तरविषयकमध्ययनम् (Interdisciplinary Study) अपि भविष्ये अनुसंधानस्य महत्त्वपूर्णः क्षेत्रः भवितुमर्हति। पाण्डुलिपयः केवलं साहित्यिकग्रन्थाः न, अपि तु इतिहासः, समाजशास्त्रं, कला, विज्ञानम्, चिकित्सा तथा ज्योतिषशास्त्रादीनां विषयेषु अपि बहुमूल्यं ज्ञानं वहन्ति। अतः विविधविषयेषु विशेषज्ञैः संयुक्तरूपेण एतासां पाण्डुलिपीनां अध्ययनं कर्तुं शक्यते।

५. अनुवादकार्यं (Translation Studies) अपि अत्यन्तमावश्यकमस्ति। अनेकाः संस्कृतं, प्राकृतं, पालिस्तथा प्रादेशिकभाषासु लिखिताः ग्रन्थाः केवलं सीमितविद्वत्समाजे एव ज्ञाताः सन्ति। यदि तेषां आधुनिकभाषासु अनुवादः क्रियते, तर्हि एतज्ज्ञानं व्यापकजनसमाजस्य कृते उपलब्धं भविष्यति।

६. पाण्डुलिपिषु निहितज्ञानस्य आधुनिकदृष्ट्या पुनर्मूल्यांकनमपि भविष्ये अनुसंधानस्य एकः महत्त्वपूर्णः विषयः अस्ति। आयुर्वेदो, गणितं, खगोलशास्त्रं, वास्तुशास्त्रमित्यादिषु प्राचीनग्रन्थेषु निहिताः सिद्धान्ताः आधुनिकविज्ञानस्य सन्दर्भे पुनः परीक्षितुं शक्यन्ते। एतादृशेन अनुसन्धानकार्येण भारतीयज्ञानपरम्परायाः वैज्ञानिकमहत्त्वमधिकं स्पष्टं भविष्यति।

अतः स्पष्टं भवति यत्पाण्डुलिपिविषये भविष्ये अनुसंधानस्य क्षेत्रमत्यन्तं व्यापकं तथा समृद्धमस्ति। यदि विद्वांसः, अनुसन्धानकर्तारः तथा शैक्षिकसंस्थाः संयुक्तरूपेण एतस्मिन् क्षेत्रे कार्यं कुर्वन्ति, तर्हि भारतीयज्ञानपरम्परायाः नूतनानि तथ्यानि तथा मूल्यवान् सिद्धान्ताः जगतः समक्षं प्रकाशं प्राप्स्यन्ति।
अन्ततः इदं वक्तुं शक्यते यत् पाण्डुलिपयः केवलं अतीतस्य स्मृतिचिह्नानि न, अपि तु भविष्यस्य ज्ञानविकासाय अपि प्रेरणास्रोतांसि सन्ति। अतः तासां संरक्षणं, अनुसन्धानम् तथा प्रसारणम् भावीपीढीनां कृते अत्यन्तमावश्यकमिति निश्चितमिति शिवम्।

## ❖ तथ्यसूत्राणि

1. श्रीमद्भगवद्गीतायां ४.३८
2. नीतिशतके २०
3. श्रीमहाभारते अदिपर्वणि २६७
4. श्रीविष्णुपुराणे १-१९-४१
5. तैत्तरीयोपनिषदि २-१-१
6. ऋग्वेदे १.१६४.४६
7. बृहदारण्यकोपनिषदि २-४-१५
8. नीतिशतके १२
9. महोपनिषदि ४.७१

## ❖ सन्दर्भग्रन्थसूची


१. Winternitz. M. (1981). A history of Indian literature (Vols. 1–3). Delhi: Motilal Banarsidass.

২. Basu.Prof.Ratna & Das. Prof. Karunasindhu Ed .(2005). Aspects of Manuscriptology . kolkata: The Asiatic Society.
৩. Ananyananda .Swami.(1958).The complete Works Of Swami Vivekananda.Mayavati memorial edition.Calcutta: Advaita Ashrama .
৪. Sen, D. C. (1911). History of Bengali language and literature. Calcutta: University of Calcutta.
৫. Sen, S. (1971). History of Bengali literature. New Delhi: Sahitya Akademi.
৬. Mandal. Shripanchanan.(1358 bangabda). Punthi parichaya . Calcutta:Viswavarati Granthalaya.
৭. Dwivedi . Dr kapildev.(2000).Vaidic Sahitya Eban sanskriti.Varanasi: viswavidyalaya Prakashan.
৮. Datta, S. (2003). Manuscripts and manuscriptology in India. New Delhi: Bharatiya Kala Prakashan.
৯. Bhattacharya, B. (1993). Indian manuscript culture and preservation. New Delhi: National Mission for Manuscripts.
১০. Karim. Abdul.(1320 bangabda). Prachin puthir vivaran. Ed. Shriramkamal singha. Calcutta: Bangiya sahitya parishat.
১০. Sarkar . Sampa . (1413bangabda). Punthir Katha(2nd) . Kolkata: Rabindra Bharati University.
১১. Bhoumik. Dr.Kalpana.(1992). Pandulipi Pathan Sahayika . Dhaka: Dhaka Viswavidyalaya.
১২. Mukharjee . Dr.Anima.(2001).Punthipath o Sampadana Riri.Kolkata: Punscha.
১৩. Haldar.Dr.Kalpana.(1998).Pandulipi pathan sahayika . Kolkata: Sahityalok.
১৪. Goswami . Subudhicharan . (2018) . Punthividya Tattwa o Prayog . Kolkata: Paschimbanga Rajya Pustak Parshat.
১৫. Kundu . Dr.Puripriya . (2017) . Prunthividyar Prathamik Dharana . Kolkata: Sanskrit Pustak Bhandar .